कात् सङ्गमात् ह्रदात् । मृत्तिकां रोचनां गन्धान् गुग्गुलुञ्चाप्सु निःक्षिपेत् । या आहृता एकवर्णैश्चतुर्भिः कलशैर्ह्रदात् । चर्म्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं तथा । सहस्राक्षं शतधारमृषिभिः पावनं कृतम् । तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते । भगन्ते वरुणो राजा भगं सूर्य्यो वृहस्पतिः । भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः । यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि । ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा । स्नातस्य सार्षपं तैलं स्रुवेणोडुम्बरेण च । जुहुयान्मूर्द्धनि कुशान् सव्येन परिगृह्य च । मितश्च संमितश्चैव तथा शालकटङ्कटौ । कुष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः । नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः । दद्याच्चतुष्पथे सूर्पे कुशानास्तीर्य्य सर्वतः । कृताकृतांस्तण्डुलांश्च पललौदनमेव च । मत्स्यान् पक्वांस्तथैवामान् मांसमेतावदेव तु । पुष्पं चित्रं सुगन्धञ्च सुराञ्च त्रिविधामपि । मूलकं पूरिकापूपांस्तथैवैरण्डिकाः स्रजः । दध्यन्नं पायसञ्चैव गुड़पिष्टं समोदकम् । एतान् सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः । विनायकस्य जननीमुपतिष्ठेत्ततोऽम्बिकाम् । दूर्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमञ्जलिम् । रूपं देहि यशो देहि भाग्यं भगवति ! देहि मे । पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे । ततः शुक्लाम्बरधरः शुक्लगन्धानुलेपनः । ब्राह्मणान् भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि । एवं विनायकं पूज्य ग्रहांश्चैव विधानतः । कर्म्मणां फलमाप्नोति श्रियञ्चाप्नोत्यनुत्तमाम् । आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा । महागणपतेश्चैव कुर्व्वन् सिद्धिमवाप्नुयात्” ।

**गणपर्व्वत** पु० गणभूयिष्ठः पर्वतः । कैलासाचले त्रिका० ।

**गणपाठ** पु० गणानां स्वरादिगणानां पाठोऽत्र । पाणिन्यादिरचिते स्वरादिगणानां स्वरूपकथने ग्रन्थभेदे ।

**गणपाद** पु० गणस्येव पादोऽस्य । प्रमथतुल्यपादयुक्ते युक्तारोह्यादित्वादाद्युदात्ततास्य । [शब्दच० ।

**गणपीठक** न० गणस्य पीठ इव कायति कै—क । १वक्षसि

**गणपुङ्गव** पु० गणः पुङ्गव इव उपमि०स० । १गणश्रेष्ठे २देशभेदे च । ३तत्रवासिषु ४तद्देशनृपेषु च बहुव० “कौलिङ्गान् गणपुङ्गवानथ शिवीनायोध्यकान् पार्थिवान्” वृह० स० ४अ० ।

**गणपूज्य** पु० गणो गणेशः प्रमथो वा पूज्योऽत्र । १देशभेदे २तद्देशस्थजनेषु ३तन्नृपेषु च बहुव० । “गणपूज्यस्खलितव्रतशवरपुलिन्दार्थपरिहीनाः” वृह० सं० १६अ० ।

**गणपूर्व्व** पु० गणानां ग्रामादिस्थलोकानां पूर्व्वः प्रधानम् । ग्रामण्याम् “अपरिज्ञातपूर्व्वांश्च गणपूर्व्वांश्च भारत !” भा० आ० २३अ० आह्वानार्हकथने । “गणपूर्व्वा ग्रामण्यः” नीलक० । गणमुख्यादयोऽप्यत्र । “रविजेन सिते विजिते गणमुख्याः शस्त्रजीविनः क्षतम्” वृह०स० १७अ०

**गणभर्त्तृ** पु० गणानां प्रमथादीनां भर्त्ता । १महादेवे । “भृङ्गारायमूर्ध्व भजते गणभर्त्तुरुच्चा” किरा० । गणस्वामिप्रभृतयोऽप्यत्र । २गणेशे ३समूहस्वामिनि त्रि० ।

**गणयज्ञ** पु० गणस्य भ्रातॄणां सखीनां वा समूहस्य कर्त्तव्यः यज्ञः । मरुत्स्तोमाख्ये भ्रातृसखिवर्गकर्त्तव्ये यज्ञभेदे । “वैश्यस्तोमदक्षिणालिङ्गो मरुत्स्तोमे गणयज्ञो भ्रातॄणां सखीनां वा” कात्या० श्रौ० २२।११।१२ । “सत्रगणयज्ञे सहत्वशब्दात्” कात्या०२५।१३।२८ । “एतच्च सत्रे भवति गणयज्ञे च “तेन सह यजेरन्निति” सहत्वशब्दात्”कर्कः। ‘तयोरनेकयजमानसद्भावान्नान्यत्र”सं०व्या० ।

**गणयाग** पु० गजोद्देशेन शान्त्यर्थं यागः । गणेशोद्देशेन कर्त्तव्ये गणपतिकल्पोक्ते तत्स्नपनादौ “विजयस्नानग्रहयज्ञगणयागाग्निलिङ्गेत्यादि” वृह०सं०२अ० ।

**गणरत्न** न०गणाः स्वरादयः रत्नानीव यत्र । पाणिन्युक्तस्वरादिगणानाम् श्लोकैर्निर्बन्धनपूर्वकं तदर्थकथनरूपे ग्रन्थभेदे । तस्य व्याख्या गणरत्नमहोदधिः ।

**गणराज्य** न० वृ० स० १४ उक्ते दक्षिणस्यामुक्ते देशभेदे “गणराज्यकृष्णवेल्लूरेत्यादि तद्वाक्यं कूर्म्मविभागशब्दे २४६८ पृ० उक्तम् ।

**गणरात्र** न० गणानां रात्रीणां समाहारः गणशब्दस्य संख्यावत्त्वात् द्विगुस० अच्समा० । रात्रिवृन्दे ।

**गणरूप** पु० गणा बहूनि रूपाण्यस्य । १अर्कवृक्षे अमरः । संज्ञायां कन् । गणरूपक राजार्कें राजनि० ।

**गणरूपिन्** पु० गणा बहूनि रूपाणि सन्त्यस्य इनि । श्वेतार्कें रत्नमा० ।

**गणवत्** त्रि० गणोऽस्त्यस्य मतुप् मस्य वः । १गणयुते “गणवती याज्यानुवाक्ये भवतः” तैत्ति० २।३।३।५ । स्त्रियां ङीप् । सा च २दिवोदासमातरि त्रिका० ।

**गणशस्** अव्य० गण+वीप्सार्थवृत्तौ कारकार्थे शस् । गणान् गणान् कृत्वा इत्याद्यर्थे । “स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या